अष्टमः पाठः

# यातायात-संकेताः



एकदा निखिलः स्व पितामहेन सह नगरं गच्छति। तत्र चतुष्पथे मार्गात् पारं गमने भयं करोति।

पितामहः - पुरतः यातायातस्य सकेतं पश्य। संकेते त्रिवर्णाः सन्ति।

निखिलः - किम् इमे सकेताः प्रकाशाय सन्ति ?

पितामहः - न! इमे यातायातस्य संकेताः सन्ति। रक्तवर्णस्य संकेतस्य अर्थः अस्ति-तिष्ठ। पीतवर्णस्य संकेतस्य अर्थः अस्ति-प्रतीच्छ अथवा सावधानः। हरितवर्णस्य संकेतस्य अर्थः अस्ति-अग्रेसर अथवा चल।

निखिलः - पितामह! अयं श्वेतश्याम वर्णस्य पङ्क्तिः किमर्थम् अस्ति ?

पितामहः - अयं पदातिनां पारं गमन मार्गः (जेब्रा क्रॉसिंग) अस्ति। अनेन जनाः पदतिः पारं गच्छति।

निखिलः - अहो इयं व्यवस्था अत्यन्तं सरला अस्ति। क्षणान्ते रक्तवर्णस्य संकेतः भवति। सर्वाणि वाहनानि स्व-स्व स्थाने तिष्ठन्ति। तदनन्तरं निखिलः पितामहेन सह मार्गं पारं करोति।

शब्दार्थाः

**चतुष्पथे** - चैराहे पर, **पश्य** - देखो, **त्रिवर्णाः** - तीन रंग के, **रक्तवर्णस्य** - लालरंग के, **पीतवर्णस्य** - पीले रंग के, **तिष्ठ** - रुको, **प्रतीच्छ** - प्रतीक्षा करो, **हरितवर्णस्य** - हरे रंग के, **श्वेतश्याम- वर्णस्य पङक्तिः**-जेब्रा क्रॉसिंग।

अभ्यासाः

**1. प्रश्नानाम् उत्तराणि लिखत-**

यथा- निखिलः स्वपितामहेन सह कुत्र गच्छति ? नगरम् ।

(क) संकेते कति वर्णाः सन्ति ? .................।

(ख) रक्तवर्ण-संकेतस्य कः अर्थः अस्ति ? .................।

(ग) हरितवर्ण-संकेतस्य कः अर्थः अस्ति ? .................।

**2. अधोलिखितं वाक्यं कः कथयति इति चित्वा लिखत-(पितामहः/निखिलः)-**

यथा- किम् इमे संकेताः प्रकाशाय सन्ति ? निखिलः।

(क) पीतवर्ण-संकेतस्य अर्थः अस्ति-प्रतीच्छ अथवा सावधानः।............।

(ख) अयं पदातिनां पारं गमन मार्गः अस्ति। ...........।

(ग) अहो! यातायातस्य इयं व्यवस्था अत्यन्तं सरला अस्ति। ............।

**3. सत्य कथनस्य समक्षम् 'आम्' असत्य-कथनस्य च समक्षं 'न' इति लिखत-**

यथा- निखिलः स्व मित्रेण सह नगरं गच्छति। ( न )

(क) संकेते पञ्च वर्णाः सन्ति। ( )

(ख) रक्तवर्ण-संकेतस्य अर्थः अस्ति-तिष्ठ। ( )

(ग) हरितवर्ण-संकेतस्य अर्थः अस्ति-गच्छ। ( )

*शिक्षण-संकेतः*

*शिक्षकः मार्गसुरक्षा व यातायातनियम-विषये छात्रैः सह चर्चां कुर्यात्।*